Shodhshauryam, International Scientific Refereed Research Journal
© 2021 SHISRRJ | Volume 4 | Issue 1 | ISSN : 2581- 6306

# काव्यशास्त्राणामुत्पत्तिविकासविषयकं पर्यालोचनम्

डॉ. प्रदीपकुमारवाग्
सहाचार्य:, साहित्यविभाग:, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति:

**Article Info**
Volume 4, Issue 1
Page Number : 258-262
Publication Issue :
January-February-2021
**Article History**
Accepted : 01 Jan 2021
Published : 10 Jan 2021

**सारांश:** - विश्ववाङ्मये केषाञ्चित् प्रतिभावतां संस्कृतसाहित्यकाराणां सारस्वतरचनाचिरं विराजन्ते, येषां प्रेरणया कविकुलं निरन्तरं नवकाव्यवैभवसम्पादने समर्था भवन्ति। एवं प्रकारेण वैदिकसाहित्ये संहिताब्राह्मणोपनिषदादिषु साहित्यिकछटारूपेणालंकारादीनां प्रयोग: दृश्यते। अत: संस्कृतकाव्यसाहित्यानामुत्पतिर्विकासश्च कदा प्रभृति सञ्जात: इत्येष एव विषय: पत्रेऽस्मिन् मया विशिष्यतया विचारित:।

**मुख्यशब्दा:**- महाकविर्वाल्मीकि: काव्यशास्त्र: साहित्य:, साहित्यदर्पण:।

**स्कृतसाहित्यस्य स्वरूपम् -** पुण्यभूमौ भारतवर्षे संस्कृतसाहित्यस्य पूचार: पूसारश्च प्राचीनकालादेव पूचलति। महाकविर्वाल्मीकि: संस्कृतसाहित्यमधिकृत्य यद्रामायणं व्यरचयत्तत् खलु पृथिव्या आदिकाव्यरूपेण सर्वैरङ्गीकियते। यतो हि निषादशरपातेन निहतस्य क्रौञ्चस्य वियोगजनितेन क्रौञ्च्या: शोकेन विगलितहृदयो वाल्मीकि: स्वकीयं शोकोच्छ्वासं श्लोकत्वेन यदा पर्यणमयत्तदा पृथिव्या आदिकाव्यं रामायणमिति सृष्टम्। तदारभ्य साम्प्रतिककालं यावदनुदिनं नाना प्रकारकाणि काव्यानि कवयन्तो विराजन्ते कवय:। संस्कृतसाहित्यस्य वाङ्मये विलिखितेषु नैकेषु विभिन्नप्रकारकेषु काव्येषु महाकाव्यानां प्राधान्यं साम्प्रतियुगेऽपि सर्वै: स्वीक्रियते। तत्रापि महाकाव्यानां रचयितारो यद्यप्यनेके सन्ति, तथापि तेषु कालिदासादयो द्वित्रा पञ्चसा वा प्रधानीभूता भवन्ति। तेषां काव्यानि खलु विश्वप्रसिद्धानि। तादृशेषु महाकविषु कालिदास: श्रेष्ठ इत्यत्र नास्ति कापि विप्रतिपत्ति:।

संस्कृतभाषया रचितं साहित्यं संस्कृतसाहित्यमिति कथ्यते। साहित्यं नाम काव्यानां समष्टि:। यथा कालिदाससाहित्यमित्युक्ते कालिदासविरचितानां रघुवंश-कुमारसम्भव-मेघदूत-ऋतुसंहार-मालविकाग्निमित्र-विक्रमोर्वशीय- शाकुन्तलादिनाटकानां खलु प्रसिद्धिर्विद्यते। तेषां समेषां सर्वविधानां काव्यानां समष्टिरेव कालिदाससाहित्यमिति कथ्यते। साहित्यज्ञानं सर्वेषामनिवार्यं ; यतो हि साहित्यं विना मनुष्य: पशुरेवेति। यथोक्तं प्रसङ्गेऽस्मिन्[1]'भर्तृहरिणा-साहित्यसङ्गीतकलाविहीन: साक्षात्पशु: पुच्छविषाणहीन: इति। काव्यमीमांसायामपि राजशेखरेण साहित्यं पञ्चमी विद्येति प्रत्यपादि। यथा प्रतिपादितं तेन[2] पञ्चमी साहित्यविद्येति यायावरीया:। पुनश्च साहित्यं चतसृणां विद्यानां निस्यन्द इति, साहित्यं काव्यमेवेति च नैषधकारेण श्रीहर्षेण प्रतिपादितम्। यथोक्तं तेन

**साहित्ये सुकुमारवस्तुनि दृढन्यायगृहग्रन्थिले।**
**तर्के वा मयि संविधातरि समं लीलायते भारती।।**[3]

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

सामान्यतः साहित्यशब्देन सहितस्य भाव इति बोध्यते। तस्माद्वेदपुराण–रामायण–महाभारतादीन्यपि यदि साहित्यपदेन व्यपदिश्यन्ते तर्हि न कापि क्षतिः। अत एव साहित्यशब्दस्य वाङ्मयमित्यर्थः समीचीनः। ततः संस्कृतसाहित्यं नाम संस्कृतभाषया लिखितं समग्रमेव वाङ्मयमिति। इदमेव संस्कृतसाहित्यं विश्वस्य सर्वबृहत्तमं प्राचीनतमञ्च साहित्यमिति वदन्ति ऐतिहासिकाः। संस्कृतसाहित्ये धर्मार्थकाममोक्षाश्चतुर्वर्गाः सम्यक् प्रतिपादिताः। शब्दार्थयोः सम्मिश्रणेन साहित्यस्य सृष्टिः। तयोश्च सम्बन्धो नित्य एव। अर्थाद्यत्र यत्र च शब्दत्वं तत्र तत्र चार्थत्वम्। शब्दार्थयोर्मञ्जुलसमन्वयेन यो भावः सञ्जायते, स भाव एव साहित्यमिति सहृदयानामाशयः। फरासीसाहित्यिकहेण्टेल्महोदयस्य[4] मतानुसारेण साहित्यं समाजस्याऽभिव्यक्तिरूपम्। तद्धि व्यक्तेरनुभूतिं भावनां कल्पनाश्च नीत्वा रूपायितं भवति। ततश्च साहित्यं समाजस्य दर्पणमिति कथ्यते। मार्क्सवादिनां मते साहित्यं समाजस्य परिवर्त्तनाय खल्वव्यर्थमस्त्रस्वरूपम्। तल्लक्षीकृत्यैवालङ्कारिको विश्वनाथकविराजः साहित्यदर्पणं व्यरचयत्।

धार्मिकदृष्ट्यापि संस्कृतसाहित्यस्य विशेषतो गुरुत्वं विद्यते। वेदधर्मशास्त्रादिग्रन्थाः संस्कृतसाहित्यपदेनापि बोध्यन्ते। अतः संस्कृतसाहित्यं सर्वप्राचीनत्वेन गुरुत्वपूर्णत्वेन च संस्कृतभाषया लिखितस्य साहित्यस्य गौरवं विशेषत्वञ्च वर्द्धयतीत्यत्र नास्ति संशयलेशः।

समुपसर्गात् कृधातोः घञ्प्रत्यये कृते सुडागमे च सति संस्कृतशब्दो निष्पद्यते। अतः संस्कृतं नाम शुद्धमित्यर्थ। इदमेव च संस्कृतं सर्वाभ्यो भाषाभ्यः शुद्धतरं सावलील वैज्ञानिकं प्राचीनतरञ्च भवति। सर्वासां प्रान्तीयभाषाणामियं खलु जननीरूपा। प्राचीनकाले साधारणा जना अपि संस्कृतभाषया वार्त्तालापं कुवन्ति स्म। अद्यापि भारतवर्षे एतादृशो ग्रामोऽस्ति यत्र केवलं संस्कृतभाषया एव वार्तालापः क्रियते। विषयेऽस्मिन् रामायणतोऽपि प्रमाणमुपलभ्यते। तद्यथा– यदा सीतामन्वेष्टुं हनुमान् लङ्कापुरीं जगाम, तदाऽशोकवने शोकगुस्तायाः सीतायाः समक्षमाविर्भूय कया वा भाषयाऽसौ सीतां सम्बोधयिष्यतीति विचिकित्सायामुवाच –

**यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम्।**

**रावणं मन्यमाना मां सीता भीता भविष्यति॥**[5]

अनेन ज्ञायते यत् तदानीन्तनकाले रावणतुल्या विद्वांसः संस्कृतभाषयैव वार्तालापं कुर्वन्ति स्म। तथा च हनुमज्जातीयाः कतिचन शुद्धपूताः पशवोऽपि संस्कृतभाषया वार्ता – लापं कर्तुं समर्था आसन्। इयञ्च भाषा देवानां भाषेति कृत्वा देवभाषेति कथ्यते संस्कृतभाषया वैदिकग्रन्था लौकिकग्रन्थाश्च विरचिताः। तस्मात् संस्कृतसाहित्यं वैदिकसाहित्य–लौकिकसाहित्यभेदेन द्वेधा। वैदिकसाहित्यस्य भाषा वैदिकव्याकरणदृट्या त्वीषत् क्लीष्टतरा, किन्तु लौकिकसाहित्यस्य भाषा चापेक्षाकृत सरला। वैदिकसाहित्ये वेदस्य संहिता, ब्राह्मणग्रन्था आरण्यका उपनिषदः,श्रौतसूत्राणि, शुल्वसूत्राणि, गृह्यसूत्राणि चान्तर्भवन्ति। लौकिकसाहित्ये काव्यानि, नाटकानि, पुबन्धाः इतिहासादयश्चान्तर्भवन्ति। वैदिकसाहित्यस्य शैली प्रायशो गद्यमयी; लौकिकसाहित्यस्य शैली पद्यमयी गद्यमयी च। केषाञ्चिदैतिहासिकानां मते संस्कृतभाषा कथितभाषा लोकभाषा वा नासीत्। केवलं शास्त्राणि काव्यनाटकादीनि चानया भाषया विरचितान्यभूवन्। कथितभाषा तु प्राकृतमासीत्। संस्कृतनाटकेषु दृश्यते यदुच्चकोटिकाश्चरित्राः संस्कृतभाषया निम्नकोटिकाश्च प्राकृतभाषया व्यवहारं कृतवन्तः। इयञ्च प्राकृतभाषा संस्कृतभाषाया अपभ्रष्टेति केचन वदन्ति। भारतवर्षे यदा शास्त्राणि विरचितानि तदा संस्कृतं विहाय नान्या कापि भाषासीदिति हेतोस्तयैव संस्कृतभाषया सर्वाणि शास्त्राणि विरचितानि। अतस्तत्काले भाषेति कथनेन संस्कृतभाषामात्रमासीत्। परवर्त्तिकाले प्राकृतभाषा संस्कृतानुसारिण्यश्चान्या अनेकाः प्रान्तीया भाषाः

समुत्पन्ना: या देशे विदेशेऽपि प्रसिद्धिं गता:। तेन सर्वासु भाषासु संस्कृतस्य सारूप्यं सादृश्यञ्च दृश्यते। अत: संस्कृतसाहित्यमतीव प्राचीनतमं प्रामाणिकं धार्मिकमाध्यात्मिकं संस्कृतिसंरक्षकं सामाजिक परिमार्जितञ्च साहित्यमित्यत्र न कापि विपतिपत्ति:।

## ● संस्कृतसाहित्यस्य रचनाकाल:

संस्कृतसाहित्यमिति कथनेन रामायणादारभ्याद्यावधि विरचितानां गद्यकाव्यपद्यकाव्य–गीतिकाव्य–खण्डकाव्य–नाटक–नाटिका – गल्प–पुबन्धादीनां समेषां ग्रहणं भवति। तेषु शैलीदृट्या ऐतिहासिकानां मते काव्यानां प्राथम्यं स्वीकियते। यतो हि पद्यमयी शैली प्राचीनैव। तस्मादेव कारणात् पृथिव्यामादिकाव्यं समायातमित्युच्यते। तत: पूर्वं श्लोकबद्धं काव्यं जगति नासीत्। अत एव संस्कृतसाहित्यस्य सृष्टि: रामायणादेवेति नात्र संशय:। तस्यैव रामायणस्य वाल्मीकिरचितस्य क: काल इति जिज्ञासायामैतिहासिकैरुच्यते यत् – ख्रीष्टजन्मनोऽष्टशतवर्षेभ्य: पूर्वमेव रामायणं विरचितम्। याकाबि–म्याग्डोनाल–विलियमजोनस्–पूभृतीनां वैदेशिकेतिहासकाराणां मते रामायणस्य रचनाकाल: ख्रीष्टजन्मन: पञ्चशतवर्षेभ्य: पूर्वमिति निर्द्धारितम्।

बौद्धसाहित्ये जैनसाहित्ये च रामायणकथायाश्चित्रणं दृश्यते। बौद्धजातकेऽपि तथा उल्लेखो विद्यते। जातकानां समय: ख्रीष्टजन्मन: त्रिंशद्वर्षेभ्य: पूवर्मिति कथितम्। अतो रामायणस्य रचनाकाल: तत: पूर्वमिति निश्चितम्। पुनश्च रामायणे व्याकरणस्य साधुप्योगो बहुषु स्थलेषु न दृश्यते। तत्र चार्षप्रयोगस्य प्राचुर्य्यात् रामायणस्य रचना ख्रीष्ट जन्मन: पञ्चशतवर्षेभ्य: पूर्वमभूदिति ऐतिहासिका अभ्युपगच्छन्ति। यद्यपि रामायणस्य रचना वाल्मीकिना चतुर्थत्रेतायुगे विहितेति नियमेन रामायणस्य रचनाकालोऽद्यतोऽष्टलक्षवर्षेभ्य: पूवर्मित्यनुमीयते, तथाप्यैतिहासिक विचारदृट्या ख्रीष्टजन्मन: पञ्चशतवर्षेभ्य: पूर्वमष्टशतवर्षेभ्योऽनन्तरञ्च रामायणस्य रचना सञ्जाता। तदेव रामायणं संस्कृतभाषया लिखितमस्ति।

अत: संस्कृतसाहित्यस्य सृष्टिरद्यत: सार्द्धद्विसहसूवर्षेभ्य: पूर्वमेवेति कथनं समीचीनम्। तदनन्तरं कुमश: गद्यनाटकगल्पप्रभृतीनां रचना जाता।

वैदिकसाहित्यस्य रचनापि ख्रीष्टजन्मन: चतु:शतवर्षेभ्य: पूर्वं सञ्जाता। तत्र श्रौतसूत्राणां शुल्वसूत्राणां रचनापि जाता। ततश्च ब्राह्मणारण्यकोपनिषदादिग्रन्थानां रचना ख्रीष्टजन्मनो द्विशतवर्षेभ्य: पूर्वमेव सज्जाता। ततश्च वैदिकसंस्कृतसाहित्यस्य सृष्टिरभूत्। कूमशो लोकरुच्यनुसारेण काव्यानां भेदा: परिकल्पिता:। तदनन्तरं गल्पनिबन्धादिरचनायां जनानां प्रवृत्ति: समुदिता। वस्तुत: साहित्यं देशस्य सामाजिकीमार्थनीतिकीं राजनीतिकीं परिस्थितिं संस्कृतिञ्चोपजीव्य विरच्यते। ऐतिहासिकान्यपि काव्यानि विरच्यन्ते। कान्तदर्शिन: खलु कवय: स्वकीयया लेखन्या समाजस्य वास्तविकं चित्रं काव्येषु प्रदर्शयन्ति। मन्त्रद्रष्टार ऋषयो यथा उपदेशमाध्यमेन शास्त्रै: समाजं शृङ्खलितं कुर्वन्ति, तथा कवयोऽपि काव्यमाध्यमेन समाजस्य कल्याणं साधयन्ति। सम्पूत्याधुनिकै: छन्दोविहीनानि काव्यान्यपि विरच्यन्ते यानि सामाजिकै: समादृतान्यपि भवन्ति। समाजस्य रुच्यनुसारेण साहित्यस्य शैल्यामपि परिवर्त्तनं दृश्यते। अनेन प्रकारेण संस्कृतभाषया विरचितं वैदिकं लौकिकञ्च साहित्यं प्रादुर्भूतं यस्य कूमिकविकाशोऽनुदिनमपि भवति। गृहे गृहे सम्पूत्यपि संस्कृतसाहित्यं विरच्यते। क्वचिद्यशोऽभिलक्ष्य क्वचिद्धनप्राप्तये क्वचिच्च केवलं परमान्दलाभाय काव्यानि विरच्यन्ते। एवं बहुविधमुद्देश्यं मनसि निधाय संस्कृतसाहित्यस्य रचना भारतवर्षे संपूवृत्ता। एतावता संस्कृतसाहित्यस्य रचनाकाल: सपूमाणं सोपपत्तिकमत्र समुपस्थापितम्। वैदिककालादारभ्यैव परि>

भारतीयसाहित्येतिहासे संस्कृतकाव्यानामुत्पत्तिः लक्ष्यते। जगतः सकलविद्यानामाधारभूता वेदाः सूक्ष्मरूपेण काव्यतत्त्वमुद्बोधयन्ति। तत्रोपमादीनामलङ्काराणां सुन्दराण्युदाहरणानि वेदेषु प्राप्यन्ते। दिङ्मात्रं तूदाह्रीयते 7 टाथाअभातेव पुंस इति पूतीची गर्त्तारुगिव समये दधाना। जायेव पत्य उशती सुवासा ऊषाहस्तेव निरीणीते अप्सः।। मन्त्रेऽस्मिनुदयकालीनबालसूर्यस्य शोभादर्शनेनैव ऋषेर्भावः काव्यरूपेणाभिव्यक्तोऽस्ति।

अभातेव,गर्त्तारुगिव,जायेव, हस्तेव इति पदचतुष्टयेषु स्पष्टरूपेणोपमालंकारः सहृदयहृदयमाह्लादयति। अथर्ववेदस्य परिशीलनेन ज्ञायते यद् वेदः परमात्मनः तादृशं काव्यं भवति यन्न कदापि नश्यति न वा पुरातनं सम्भवति। यथोक्तं तत्र – पश्य देवस्य काव्यं न ममार जीजर्ति इति। किञ्च वेदेषु कविः, काव्यं, रसः गाथा इत्यादीनां शब्दानां साक्षात् पूयोगो विभिन्नेषु स्थलेषु दृश्यते। तद्यथा

**कवी नो मित्रा वरुणा, -ऋग्वेदः-1-2-9**

**तं दक्षः स च ते कविः, -ऋग्वेदः-1-91-14**

**पुराभिन्दुर्युवा कविः, -ऋग्वेदः-1-11-4**

**कवयः सन्ति वेधसः कविः, -ऋग्वेदः-5-52-13**

**काव्येन परिपाहि राजन्,- ऋग्वेदः-10-87-21**

**आदेवानामभवः केतुरगे मन्द्रो विश्वानिविद्वान्, ऋग्वेदः-3-1-17**

**रसं ते मित्रो अर्यमा पिबन्ति वरुणः कवेः -ऋग्वेदः-9-64-14**

परवर्त्तिनि काले महाकविकालिदासकृतविकुमोर्वशीयमिति दृश्यकाव्यरचनायाः पे्ररणोत्सः संदृश्यते। उपनिषत्स्वपि काव्यतत्त्वं निहितमस्ति। तत्र 'कठोपनिषदि रूपकालङ्कारस्य च चमत्कारो दरीदृश्यते। तद्यथाआत्मानं रथिनं विद्धि शरीरं रथमेव तु। बुद्धिं तु सारथिं विद्धि मनः हमेव च।। इति। विश्ववाङ्मये केषाञ्चित् प्रतिभावतां संस्कृतसाहित्यकाराणां सारस्वतरचना चिरं विराजन्ते, येषां प्रेरणया कविकुलं निरन्तरं नवकाव्यवैभवसम्पादने समर्था भवन्ति। एवं पूकारेण वैदिकसाहित्ये संहिताबाह्मणोपनिषदादिषु साहित्यिकछटारूपेणालंकारादीनां प्रयोगः विभिन्नेषु स्थलेषु उदाहरणरूपेण दिङ्मात्रं प्रदर्शितः।

## सन्दर्भाः


1. सं. सा. इ. पृ. 11
2. का. मी. पृ.–4
3, सं. सा. इ. पृ. – 11
4. अभिव्यक्तिः पृ. 38
5. सं. सा. इ. पृ. – 19
6. कठ.– 1–3–3
7. सं. सा. इ. पृ. – 21
8. ऋ. वे. 1–1–24/7
9. अ. वे. –17–8–32

**सन्दर्भग्रन्थसूची**


1. साहित्यदर्पण:, मम्मट: ज्ञानमण्डन लिमिटेड, वाराणसी 2012
2. नाट्यशास्त्रम्, भरतमुनि:, विद्यानिधि प्रकाशन, दिल्ली 1999 .
3. ध्वन्यालोक: आनन्दवर्धन:, चौखम्बा संस्कृतभवनम्, वाराणसी, 2004
4. दशरूपकम् - धनञ्जय:, डॉ रामजी उपाध्याय:, भारतीय विद्यासंस्थानम्, वाराणसी
5. आधुनिकसंस्कृतकाव्यशास्त्रम् – डॉ आनन्दकुमार श्रीवास्तव:, ईष्टर्न बुक लिकर्स, दिल्ली
6. संस्कृतसाहित्यस्य इतिहास : – प्रो. हरेकृष्णशतपथी, किताबमहल, कटक – 1998
7. दशोपनिषद्भाष्यम्, शांकरभाष्यम् मोतीलाल बनारसीदास, बङ्गलोरोड जवाहरनग दिल्ली।
8. ईशाद्यष्टोपनिषद्भाष्यम्, व.न. कृष्णमाचार्य:, रङ्गरामानुजभाष्योपेतम्, लैजिकर्वर्धिनीसभा,
9. ऋग्वेदसंहिता, वैदिकसंशोधनमण्डलम्, पुने 411037, तृतीयसंस्करणम् 1984
10. अथर्ववेद:, सम्पादक: – शङ्कर पाण्डुरङ्ग पण्डित कृष्णदास अकादमी, वाराणसी – 221 00,संस्करणम् – 1989